तथाचैतादृशलाघवदृष्टिकौण्डपायिनामयनप्रकरणपाठ एव कर्मान्तरत्वे प्रमाणं तथाच सिद्धान्तसूत्रम् "प्रकरणान्यत्वे प्रयोजनान्यत्वमिति" अतएव प्रकरणाद्वाक्यस्य बलीयस्त्वात् शक्त्या नित्याग्निहोत्रस्योपस्थित्या गुणविधिरित्यपि निरस्तं तस्योक्तगौरवपराहतत्वात्। एवञ्च गौण्याग्निहोत्रपदप्रयोगस्तद्धर्मातिदेशार्थः अतएव "देवश्राद्धादौ श्राद्धशब्दोगौणस्तद्धर्मप्राप्त्यर्थः कौण्डपायिनामयन इवाग्निहोत्रशब्द इति" श्राद्धविवेकः।

**कुण्डपाय्य** पु० कुण्डेन कुण्डाकारेण चमसेन पीयते सोमोऽत्र आधारे यत्—पा० युगागमश्च। कुण्डपायिनामयनामके सत्रभेदे "यस्ते शृङ्गवृषो नपात् प्रणपात् कुण्डपाय्यः" ऋ० ८,१७,१३

**कुण्डभेदिन्** पु० धृतराष्ट्रपुत्रभेदे, "अनाधृष्यः कुण्डभेदी विरावी दीर्घलोचनः" भा०आ० ६७अ०

**कुण्डल** पुंन० अर्द्धर्चा०। कुण्डते कुण्डयते कुडि—दाहे कुडिरक्षायां वा कर्त्तरि कर्म्मणि वा वृषा०कलच्, कुण्डं कुण्डाकारं लाति ला—क कुण्डस्तदाकारोऽस्त्यस्य सिध्मादित्वात्लच् वा। १कर्णभूषणभेदे "कनककुण्डलवान् किरिटी" विष्णुध्या० २वलये ३वेष्टने मेदि० "मण्डलानि पताकाश्च मरीचीः कुण्डलानि च" सुश्रु० "अथैतान्युपकल्पयीत समावर्त्तमाने मणिकुण्डले वस्त्रयुगमित्यादि" आश्व० गृ० कुण्डले आबध्नीत" तत्रैव" ते च सौवर्णे एव यथाह मनुः "यज्ञोपवीतं वेदञ्च उभे रौक्मे च कुण्डले" "ताडङ्काचलकपालकुण्डला" रघुः

**कुण्डलना** स्त्री कुण्डलं वेष्टनं करोति कुण्डल+णिच्—भावे युच्। वेष्टनकरणे (वेडा देओया) "फणिभाषितभाष्यफक्किका विषमां कुण्डलनामवापिता" नैष०।

**कुण्डलिका** स्त्री मात्रावृत्तभेदे तल्लक्षणं यथा "कुण्डलिका सा कथ्यते प्रथमं दोहा यत्र। बोलाचरणचतुष्टयं प्रभवति विमलं तत्र। प्रभवति विमलं तत्र पदमतिसुललितयमकम्। अष्टपदी सा भवति विमलकविकौशलगमकम्। अष्टपदी सा भवति सुखितपठितमण्डलिका कुण्डलिनायकभणिता विबुधकर्णे कुण्डलिकेति"

**कुण्डलिन्** पुंस्त्री कुण्डलं पाशाकारं वेष्टनं वा स्त्यस्य इनि। १सर्पे स्त्रियां ङीप् २वरुणे तस्य पाशास्त्रवत्त्वात् तथात्वम्। ३मयूरे पुंस्त्री मेदि० ४चित्रमृगे ५वेष्टनयुक्ते त्रि० स्त्रियां ङीप्। सा च (जिलेपी) इतिख्याते पक्वान्नभेदे भावप्र० तत्पाकप्रकारो दर्शितो यथा

"नूतनं घटमानीय तस्यान्तः कुशलोजनः। प्रस्थार्द्धपरिमाणेन दध्नाऽम्लेन प्रलेपयेत्। द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्। घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्। आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्। ततस्तत् क्षिपेत्पात्रे सच्छिद्रे भाजने तु तत्। परिभ्राम्य परिभ्राम्य तत् सन्तप्ते घृते क्षिपेत्। पुनः पुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम्। तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रये। कर्पूरादिसुगन्धेन स्नपयित्वोद्धरेत्ततः। एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा। धातुवृद्धिकरी वृष्या रुच्या च क्षिप्रतर्पणी"।

तन्त्रसारप्रसिद्धे मूलाधारस्थिते षट्चक्रमध्यवर्त्तिस्थे देवीभेदे यथा "ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्। तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्। कोटिसौदामनीभासां स्वयम्भूलिङ्गवेष्टिनीम्। तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः। उद्यद्दिनकरोद्द्योतां यावच्छ्वासं दृढासनः। अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम्। तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत्" इति

**कुण्डशायिन्** पु० धृतराष्ट्रस्यपुत्रभेदे "अपराजितः कुण्डशायी विशालाक्षो दृढाधरः" भा० आ०१७अ०

**कुण्डाशिन्** पु० धृतराष्ट्रस्यपुत्रभेदे। "कुण्डाशी विरजाश्चैव दुःशला च शताधिका" भा० आ० ११७अ०। "अमृते जारजः कुण्डोमृते भर्त्तरि गोलकः। यस्तयोरन्नमश्नाति स कुण्डाशीति कथ्यते"देवलोक्ते २कुण्डगोलकयोरन्नभक्षके त्रि० स्त्रियां ङीप् "अगारदाही गरदः कुण्डाशी सोमविक्रयी" मनुः "अव्रती वृषलीभर्त्ता कुण्डाशी सोमविक्रयी" भा० आनु०१४३अ०

**कुण्डिक** पु० कौरवे राजभेदे। "धृतराष्ट्रोऽथ राजासीत् तस्य पुत्रोऽथ कुण्डिकः। हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः" भा० आ० ९४" अयञ्च धृतराष्ट्रः दुर्योधनपितुर्भिन्नः कुरुवंश्यः तत्रैव विस्तरः।

**कुण्डिका** स्त्री कुडि—ण्वुल्। १ कमण्डलौ हेमच०। २ पिठरे ( कुँडि) शब्दच०।

**कुण्डिन्** त्रि० कुडि—णिनि—कुण्ड+अस्त्यर्थे इनिर्वा। १कुण्डयुक्ते स्त्रियां ङीप् "रावणस्तु यतिर्भूत्वा मुण्डः-कुण्डी त्रिदण्डधृक्" भा० व० २७७अ० "दण्डी छत्री च कुण्डी च द्विजानां धारणस्तथा"भा०व०१४अ० इत्युक्ते २शिवे पु० "रत्नभाण्डभेदे स्त्री "सन्ति निष्कसह-